**मुख्यवार्ताः**

- पाकिस्तान-अधिकृत-जम्मू-कश्मीर्-प्रदेशे भयावहस्य मानव-अधिकार-उल्लङ्घनाय पाकिस्तान-देशः उत्तरदायी भवेदिति भारतं भाषते।
- हरियाणा-राज्यस्य रोहतक्-नगरे साबर्-दुग्ध-उद्योगस्य उद्घाटनावसरे केन्द्रीय-सहकार-मन्त्री अमितशाहः आह यत् भारतस्य दुग्ध-क्षेत्रे गत एकादश वर्षेषु सप्तति: प्रतिशतं यावत् वृद्धिः अभवदिति।
- वित्तमन्त्री निर्मला सीतारामनः वैश्विक-अस्थिरतायाः मध्ये देशस्य अर्थव्यवस्था स्थितिस्थापिका अस्तीति प्रत्यपादयत्।
- आकाशवाण्या: उच्चमूल्यांकितस्य **मन की बात** इति कार्यक्रमस्य अद्य एकादश वर्षाणि पूरितानि।
- भारतीय-भारोत्तोलिका-मीराबाई चानू नार्वे-देशस्य फोर्डे-नगरे आयोजितायां विश्व- भारोत्तोलन –च्याम्पियन्शिप्स इति प्रतिस्पर्धायां रजतपदकं अजैषीत्।

**विदेशमंत्रालयः**

भारतम् अद्य अवदत् यत् पाकिस्तान-अधिकृत-जम्मू-कश्मीर्-प्रदेशे भयावहतया मानवाधिकारोल्लङ्घनाय पाकिस्तानस्य उत्तरदायित्वं निश्चीयते। नवदेहल्ल्यां वार्ताहर-सम्मेलने एकस्य प्रश्नस्य प्रत्युत्तरे, विदेशमन्त्रालयस्य प्रवक्ता रणधीर जैस्वालः पाकिस्तान-अधिकृतस्य जम्मू-कश्मीरस्य अनेकेषु क्षेत्रेषु क्रूरतायाः प्रतिवेदनानि सन्ति आगतानीति अधोरेखितवान् तेनोक्तम् यत् निर्दोष-नागरिकाणामुपरि पाकिस्तान-सैनिकानां क्रूरता वरीवर्धमाना वर्तते। सः अवदत् यत् भारतानुसारम् एतत् पाकिस्तानस्य दमनकारी-दृष्टिकोणस्य स्वाभाविकं परिणामम् अस्ति तथा च एतस्य प्रदेशस्य संसाधनानां व्यवस्थित-लुण्ठनमपि अस्तीति।

**अमित शाह-हरियाणाः**

केन्द्रीय-गृह-सहकार-मन्त्री अमितशाहः अवदत् यत्, देशस्य दुग्ध-क्षेत्रे गतैकादशवर्षेषु सप्तति-प्रतिशतात्मिकी महती वृद्धिः अभवदिति। सः अवदत् यत् इदं विश्वस्य द्रुतगत्या वर्धमानं क्षेत्रम् अस्ति। मन्त्री अद्य रोहतक-आई. एम. टी. इत्यत्र साबर-डैरी इत्यस्य नवनिर्मितस्य उद्योगभवनस्य उद्घाटनम् अकरोत्। श्रीशाहः अवदत् यत्, साबर्-डैरी इत्यनेन सपादत्रिशत- कोटि-रूप्यकाणां निवेशेन सम्पूर्णदेशस्य बृहत्तमस्य उद्योगभवनस्य निर्माणं कृतमस्ति। सः अवदत् यत्, एतत् दुग्धस्य उत्पादनं कुर्वतां कृषकाणां कृते लाभप्रदं भविष्यति, सम्पूर्णस्य राष्ट्रियराजधानीति क्षेत्रस्य आवश्यकताः च पूरयिष्यति। सः अवदत् यत् दुग्धस्य क्रयणं प्रतिदिनं सार्धषड्शततोऽधिक लक्षलीटरपरिमितमस्ति।

**सीतारामन्-कौटिल्य-सम्मेलनम्**

वित्तमन्त्री निर्मला-सीतारामनः विकसितभारतस्य लक्ष्यपूर्तये अष्टप्रतिशतस्य जी.डी.पी. इत्यस्य वृद्धेः आवश्यकता अस्तीति अवदत्। नवदेहल्यां कौटिल्य-आर्थिक-सम्मेलनस्य उद्घाटन-सत्रं सम्बोधयन्ती, श्रीमती सीतारामनः दृढतया उक्तवती यत् देशस्य अर्थव्यवस्था स्थितिस्थापिका अस्ति तथा च सुस्थिरतया वर्धमाना चाप्यस्ति। सा अधोरेखितवती यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना द्वयोः मार्गयोः गतिः निर्धारिता अस्तीति। प्रथमः मार्गः सप्तचत्वारिंशदधिकद्विसहस्र-तमवर्षपर्यन्तं विकसित-भारतस्य लक्ष्यं साधयति, द्वितीयः मार्गः स्वावलंबनद्वारा एतत् लक्ष्यं साधयितुं केन्द्रितः अस्ति।

**मन की बात**

प्रधानमन्त्रिण: नरेन्द्रमोदिन: **मन की बात** इत्यस्य आकाशवाण्या: मासिक-कार्यक्रमस्य अद्य एकादशवर्षाणि सम्पूरितानि। यस्य प्रथमं प्रसारणम् आकाशवाण्यां चतुर्दशाधिकद्विसहस्रतमे वर्षे विजयदशम्यां समजायत। अवधेयं यत् साम्प्रतं यावत् प्रधानमन्त्रिणा षड्विंशत्यधिकैकशतप्रकरणेषु राष्ट्रं संबोधितम्। अस्य कार्यक्रमस्य विषये अस्माकं वार्ताहरैः संसूचितं यत् **"मन की बात"** केवलं आकाशवाण्या: कार्यक्रमः नास्ति, वरं एकः सांस्कृतिक-सामाजिक-परिवर्तनस्य प्रतीकभूतो विद्यते, यः राष्ट्रस्य सर्वाणि क्षेत्राणि यावत् सम्प्राप्तः।

एतेषु एकादशवर्षेषु प्रधानमन्त्रिणा अनेके सामाजिक-सांस्कृतिक-पर्यावरणीय-आचारसम्बद्ध-विषयाः स्पृष्टाः, यैः राष्ट्रे सकारात्मकः प्रभावः उत्पादितः। **"मन की बात"** इति कार्यक्रमः प्रधानमन्त्रिणः जनैःसह संवादाय प्रमुख: मंच: अस्ति। प्रधानमन्त्रिणा नरेन्द्रमोदिना एकस्मिन् प्रकरणे प्रोदीरितं यत् **"मन की बात"** कार्यक्रमस्य यथार्थनायकाः श्रोतारः एव सन्तीति।

**आई. ए. एफ्.-सिन्दूरः**

वायुसेनायाः प्रमुखः एयर्-चीफ्-मार्शल् अमरप्रीतसिङ्हः अवदत् यत् आपरेशन सिन्दूर इति एकेन विशिष्टसंघर्षरूपेण स्मर्यते, यत्र यथार्थतया अस्माभिः स्वलक्ष्यं साधितम्, अनेनाभियानेन पाकिस्तानदेशः अधोमुखीति कृतश्च। अद्य नवदेहल्ल्यां त्रिनवतितमं वायुसेनादिवसस्य वार्षिकोत्सवं सम्बोधयन् सः अवदत् यत् भारतदेशः पाकिस्तानस्य अनेकान् लक्ष्यान् आक्रान्तवान्, अपि च अभियानावसरे पाकिस्तानस्य पञ्च युद्धविमानान्यपि नष्टीकृतानीति।

**बिहार नितीशः**

मुख्यमन्त्रिणा नितीशकुमारेण अद्य "मुख्यमन्त्री महिला वृत्त्यवसर योजनायाः अन्तर्गतं पञ्चविंशतिलक्ष-लाभार्थिनीभ्यः प्रत्यक्षलाभहस्तान्तरेण प्रत्येकस्याः वित्तकोषे दशसहस्ररूप्यकाणि स्थानान्तरितानि। आहत्य पंचशतोत्तर-द्विसहस्रकोटिरूप्यकाणि प्रत्यक्षलाभहस्तान्तरणरूपेण प्रदत्तानि।

**म प्र छिन्दवाड़ा**

मध्यप्रदेशस्य छिन्दवाडा-मण्डले बालेषु वृक्करोगस्य प्रकरणानि निरन्तरं वर्धमानानि सन्तीति चिन्ताजनकं विवरणम् अस्ति। अद्यावधि, अनेन रोगेण षट् बालाः मृताः, अन्ये च बहवः गम्भीरावस्थायां सन्ति, ये जबल्पुर-नाग्पुर-नगरयोः प्रमुखेषु चिकित्सालयेषु प्रवेशिताः सन्ति। प्रभाविताः बालाः एकतः पञ्चवर्षाणाम् मध्यवयीयाः सन्ति, प्रशासनञ्च पूर्णतया जागरूकम् अस्ति। स्वास्थ्यविभागः अस्मिन् क्षेत्रे बालानां निरीक्षणं परीक्षणञ्च कुर्वन् अस्ति।

**बरेली-शुक्रवासरीया प्रार्थना**

उत्तरप्रदेशस्य बरेली-मण्डले स्थितिः शान्ता नियन्त्रिता च अस्ति। शुक्रवासरे प्रार्थनायाः प्राक् अनेकेषु संवेदनशीलक्षेत्रेषु सुरक्षावृद्धिः आसीत्। प्रशासनेन मण्डले अन्तर्जालसेवायां दिनद्वयस्य प्रतिबन्धो घोषितोऽस्ति।

**वियतनाम-झञ्झावातः**

वियतनाम-देशे टैफून्-बुवालोयी इत्यनेन सागरीय-झञ्झावातेन मृतानां सङ्ख्या एकपञ्चाशत् यावत् वर्धितास्ति। सर्वकारस्य विपद्-प्रबन्धन-संस्थायाः प्रतिवेदनानुसारं प्रचण्डवृष्ट्या जलप्लावनेन च चत्वारिंशत् जनाः लुप्ताः, अन्ये च सार्धैकशताधिक जनाः व्रणिताः अजायन्।

**भारतीय ऋतु विज्ञान**

भारतीय ऋतु विज्ञान विभागेन अद्य बिहारे छत्तीसगढे च अतिवृष्टेः पूर्वानुमानं प्रख्यापितम्, सहैव रेड अलर्ट इति रक्तवर्णीया संचेतना प्रसारिता। एवमेव विभागेनानेन पूर्वोत्तरभारते, मध्यप्रदेशे, पूर्वोत्तरप्रदेशे, झारखण्डे, ओडिशायां, पश्चिमबङ्गे च अतिवृष्टेः सम्भावना प्रकटिता।

**क्रीडा-भारोत्तोलनम्**

भारतीय-भारोत्तोलिका-मीराबाई चानू नार्वे-देशस्य फोर्डे-नगरे आयोजिते पंचविंशत्यधिक द्विसहस्र तम वर्षस्य विश्व-भारोत्तोलन –च्याम्पियन्शिप्स इति। प्रतिस्पर्धायां अष्ट चत्वारिंशत् कि. ग्रा. वर्गस्य स्पर्धायां रजतपदकं अजैषीत्।

**क्रिकेट**

क्रिकेट क्रीडायाम् भारतदेशः प्रभुत्वस्थितौ अस्ति, यतोहि भारतं चतु: स्तोभै: अष्ट चत्वारिंशदधिक चतु: शतम् अङ्कं अवाप्नोत्। ध्रुवः जुरेल:, रवीन्द्रः जडेजा, केएल राहुल: च शतकम् अवाप्य अग्रत्वं स्थानं भजन्ते।

**।।ति वार्ता:।।**